# संस्कृतवार्ताः

दिनाङ्क :-24.02.2025

प्रात: - 06:55

अथ वार्ताः

मोदी-प्रधानमन्त्रि योजना

प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहार-राज्यस्य भागलपुरक्षेत्रे प्रधानमन्त्रि-किसान-सम्मान-निधि-योजनाया: नवदशमं भागं विमोचयिष्यति। इयं योजना भूस्वामिनां कृषकाणां कृते त्रिषु समानभागेषु प्रतिवर्षं षड्सहस्ररूप्यकाणि प्रददाति। समग्रे हि देशे एकत्रिंशदधिक-सप्तशतं यावच्च कृषिविज्ञानकेन्द्रेष्वपि नैके कार्यक्रमा: आयोजयिष्यन्ते, यस्मिन् भूयोऽपि सार्ध-द्वि-कोटि-सङ्ख्यका: कृषक: प्रत्यक्षतया उत वा आभासिय-माध्यमेन सम्मिलिता: भविष्यन्ति। कार्यक्रमं संसूचयन् केन्द्रीयकृषिकृषक- कल्याणमन्त्री शिवराजसिंह-चौहान: सूचितवान् यत् अयं दिवस: किसान-सम्मान-समारोहत्वेन मानयिष्यते येन हि केन्द्र-राज्य-प्रशासनयो: योजनानां विषये जना: जागरूका: भवितुं शक्नुवन्ति।

दिल्ली-विधानसभा-सत्र

दिल्ल्या: अष्टम्या: विधानसभाया: प्रथम-सत्रं अद्य प्रभृति प्रारप्स्यति। सत्रस्य प्रथम-दिवसे सदनस्य नूतन-निर्वाचित-विधायका: शपथविधां अङ्गीकरिष्यन्ति तदनन्तरं विधानसभा-अध्यक्षस्य अद्यैव निर्वाचनं भविष्यति। द्वितीय-दिवसे उप-राज्यपाल: विनय-कुमार-सक्सेना सदनं सम्बोधयिष्यति। विगत-प्रशासनस्य कार्य-चर्चा-सम्बद्धं कैगइति प्रतिवेदनमपि प्रस्तोष्यते।

काशि-तमिल-सङ्गमम्

विदेश-मन्त्री डॉ एस्.-जयशङ्कर: प्रोक्तवान् यत् काशी-नगरी भारत वर्षस्य सांस्कृतिक-केन्द्रत्वेन उद्भुतास्ति। असौ अग्रे अवोचत् यत् काशी-तमिलनाडु-इत्यनयो: मध्ये

अतिप्राचीन-विशेष-सम्बन्धानाम् उत्सवो वर्तते। ह्य: वाराणस्या: काशी-हिन्दू-विश्वविद्यालये परम्परायां प्रौद्योगिक्यां अखिले हि विश्वे च काशी-तमिल-सङ्गमम् इत्यतेस्य तृतीयसंस्करणस्य शैक्षणिकसत्रं सम्बोधयन् डॉ. जयशङ्कर: विज्ञापितवान् यत् भारतं विविधतानां देशो विद्यते अपि च विभिन्न-संस्कृतिनां सत्सु अपि एकं भारतं श्रेष्ठं भारतमिति भावनां प्रदर्शयति।

<u>महाकुम्भवार्ता:</u>

तीर्थराजे प्रयागराजे प्रचल्यमाने पुण्ये महाकुम्भे त्रिवेणि-सङ्गमे साम्प्रतं यावत् षड्-लक्षाधिक-द्विषष्टिकोटि-सङ्ख्यका: श्रद्धालव: पुण्यागाहनं समाचरितवन्त:। सकल-विश्वात् लक्षाधिका: श्रद्धालव: प्रतिदिनम् अस्मिन् महाकुम्भे सम्मिलितुम् समागच्छन्तीति। अस्माकं वार्ताहरेण सूचितं यत् ह्य: प्रायश: द्वात्रिंशल्लाधिकैक-कोटि-सङ्ख्यका: श्रद्धालव: पवित्रे सङ्गमे पुण्यावगाहनं कृतवन्त:।

प्रख्यातजगत: विशिष्ट-जना: अपि अत्रावसरे सम्मिलिता: अभवन् येषु उत्तराखण्डस्य राज्यपाल: सेवानिवृत्त: लेफ्टिनेंट-जनरल-गुरमीतसिंह: ओडिशाया: मुख्यमन्त्री मोहनचरण-मांझी लोकसभा-सांसद भाजपेतिदलीय: नेता संबित-पात्राइत्यसौ गायक: कैलाश-खेर: चलच्चित्रनिर्माता बोनीकपूर: शङ्कराचार्य: भारती-तीर्थ-महास्वामीजी-वर्य: च पवित्रस्नानम् आचरितवन्त:।

<u>बाङ्ग्लादेश:</u>

भारतीय-चलच्चित्रोद्योगस्य एकादशाधिकैशततमी वर्षसम्पूर्ति: बाङ्ग्लादेशे ढाकानगरे भारतीय-संस्कृति-केन्द्रे भारतीय-चलच्चित्रजगत: यात्रा इत्यनेन शीर्षकेण प्रदर्शनाभि: च सह उद्घाटयिष्यते। बाङ्ग्लादेशे भारतस्य उच्चायुक्त: प्रणयवर्मा ढाकानगरे भारतीयोच्चायोगस्य इन्दिरा गांधीसांस्कृतिककेन्द्रद्वारा आयोजिताया: प्रदर्शन्याः उद्घाटनं विहितवान् |

<u>क्रिकेट</u>

पुरूषाणाम् आईसीसी चैंपियंस-ट्रॉफी-क्रिकेट- प्रतियोगितायां दुबय्यां अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे ह्य: रात्रौ भारतेन स्वं चिर-प्रतिद्वन्द्विनं पाकिस्तान-दलं षड् स्तौभै: पराजितम्। सर्वश्रेष्ठ-क्रीडक: विराटकोह्ली शतकं निर्मितवान्।

।। इति वार्ता:।।